भूतेशः, पुं, (भूतानां प्राण्यादीनां प्रमथादीनां वालग्रहाणाञ्च ईशः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा, राजतरङ्गिण्याम् । १ । १०७ ।
"म्लेच्छैः सञ्छादिते देशे स तदुच्छित्तये नृपः ।
तपः सन्तोषिताल्लेभे भूतेशात् सुकृती सुतम् ॥")

भूत्तमं, क्ली, (भुवि उत्तमम् ।) सुवर्णम् । इति हेमचन्द्रः । ४ । १० ॥

भूदरीभवा, स्त्री, (भूदर्य्यां भूविले भवतीति । भू + अच् । टाप् ।) आखुपर्णी । इति भावप्रकाशः ॥

भूदारः, पुं, (भुवं दारयतीति । दॄ + कर्म्मण्यण् । ३ । २ । १ । इत्यण् ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

भूदेवः, पुं, (भुवो भुवि वा देवः ।) ब्राह्मणः । इत्यमरः । ३ । ७ । ४ ॥

भूधनः, पुं, राजा । भूरेव धनं यस्य सः । इति केचित् ॥

भूधरः, पुं, (धरतीति । धृ + पचाद्यच् । भुवां धरः इति षष्ठीसमासः ।) पर्व्वतः । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । ५७ । ११ ।
"तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥")
यन्त्रभेदः । यथा,—
"जलकच्छपपातालदोलाभूधरवालुकाः ।
वकाद्या यन्त्रभेदाः स्युर्वैद्यान्याद्याश्च रूपकाः ॥"
इति शब्दचन्द्रिका ॥
(यथाचास्य व्यवहारः ।
"द्विपलं शुद्धसूतस्य सूतार्द्धं गन्धकन्तथा ।
कन्यानीरेण संमर्द्द्य दिनमेकं निरन्तरम् ॥
रुद्ध्वा तद्भूधरे यन्त्रे दिनैकं मारयेत् पुटे ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥
शिवः । यथा, महाभारते ।१३।१४।१५१।
"भूधरो नागमौञ्जी च नागकुण्डलकुण्डली ॥"
कृष्णः । यथा, भागवते । ३ । १३ । ४० ।
"दंष्ट्राग्रकोट्या भगवंस्त्वया धृता
विराजते भूधर ! भूः सभूधरा ।
यथा वनान्निःसरतो दता धृता
मतङ्गजेन्द्रस्य सपत्रपद्मिनी ॥")

भूधात्री, स्त्री, (भूलग्ना धात्री ।) भूम्यामली । इति राजनिर्घण्टः ॥ (यथास्य गुणाः ।
"भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ।
पिपासाकासपित्तास्रकफकण्डूक्षतपाहा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
वटुकभैरवः । इति विश्वसारतन्त्रे तस्य शतनामस्तोत्रम् ॥

भूध्रः, पुं, (भुवं धरतीति । धृ + मूलविभुजादित्वात् । ३ । २ । ५ । इत्यस्य वार्त्तिकोक्त्या कः ।) पर्व्वतः । इति हेमचन्द्रः । ४ । ९३ ॥

भूनागः, पुं, उपरसविशेषः । तत्पर्य्यायः । क्षितिनागः २ भूजन्तुः ३ रक्तजन्तुकः ४ क्षितिजः ५ क्षितिजन्तुः ६ रक्ततुण्डकः ७ । अस्य गुणाः । वङ्गमारकत्वम् । नानाविज्ञानकारकत्वम् । रसजारणत्वम् । तत्सत्त्वस्य विषापहत्वञ्च । इति राजनिर्घण्टः ॥

भूनिम्बः, पुं, क्षुपविशेषः । चिराता इति भाषा । (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ।
"मधूकभूनिम्बगुडूचिका इति समभागाः कल्कः स्यात् ।")
तत्पर्य्यायः । अनार्य्यतिक्तः २ कैरातः ३ रामसेनकः ४ किराततिक्तः ५ हैमः ६ काण्डतिक्तः ७ किरातकः ८ । इति राजनिर्घण्टः ॥ कटुतिक्तः ९ । इति भावप्रकाशः ॥ (तथा चास्य पर्य्यायान्तरम् । वैद्यकरत्नमालायाम् ।
"किराततिक्तं कैरातं भूनिम्बः काण्डतिक्तकः ॥")
अस्य गुणाः । वातिकत्वम् । तिक्तत्वम् । कफपित्तज्वरापहत्वम् । व्रणसंरोपणत्वम् । पथ्यत्वम् । कुष्ठकण्डूतिशोफनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"किरातकोऽन्यो नेपालः सोऽर्द्धतिक्तो ज्वरान्तकः ।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ॥
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् ॥"
इति भावप्रकाशः ॥
अस्य गुणपर्य्यायान्तरे किराततिक्तशब्दे द्रष्टव्ये ॥

भूनीपः, पुं, (भूमिलग्नो नीपः । शाकपार्थिवादिवत् समासः ।) भूमिकदम्बः । इति राजनिर्घण्टः ॥

भूनेता, [ऋ] पुं, (भुवो नेता नायकः ।) राजा । इति केचित् ॥

भूपः, पुं, (भुवं पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) राजा । इत्यमरः । २ । ८ । १ ॥ अर्थलोभेन प्रजादण्डकरणे तस्य पापं यथा ।
"अर्थलोभेन यो भूपः प्रजादण्डं करोति च ।
वृश्चिकानाञ्च कुण्डे स तल्लोमाब्दं वसेद्ध्रुवम् ॥
ततो वृश्चिकजातिश्च सप्तजन्मसु भारते ।
ततो नरश्चाङ्गहीनो व्याधी शुद्धो भवेन्नरः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

भूपतिः, पुं, (भुवः पतिः ।) वटुकभैरवः । यथा,
"भूधरो भूधराधीशो भूपतिर्भूधरात्मकः ।"
इति विश्वसारतन्त्रोक्तभैरवस्तोत्रम् ॥
राजा । यथा,—
भूपुत्त्री यस्य पत्नी स तु भवति कथं भूपती रामचन्द्रः ।
इति रामायणे कैकयीवाक्यम् ॥
ऋषभौषधम् । इति राजनिर्घण्टः ॥

भूपदः, पुं, (भुवि पदानि मूलान्यस्य ।) वृक्षः । इति शब्दचन्द्रिका ॥

भूपदी, स्त्री, (भुवि पदं यस्याः । गौरादित्वात् ङीष् ।) मल्लिका । इत्यमरः । २ । ४ । ७० ॥ (यथास्याः पर्य्यायः ।
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भूपलाशः, पुं, (भुवि पलाशमस्य ।) वृक्षभेदः । विशाली इति भाषा । यथा,—
"अचोड़कः सुकल्कश्च भूपलाशो विशल्यकृत् ।"
इति रत्नमाला ॥

भूपाटली, स्त्री, (भुवि जाता पाटलीव ।) वृक्षविशेषः । भूयातानि इति वेनवादवी इति च हिन्दीभाषा । तत्पर्य्यायः । भूकुम्भी २ भूताली ३ रक्तपुष्पिका ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । पारदे प्रयोजकत्वञ्च । इति राजनिर्घण्टः ॥

भूपालः, पुं, (भुवं पालयतीति । पालि रक्षणे + "कर्म्मण्यण् । ३ । २ । १ । इत्यण् ।) राजा । इति शब्दमाला ॥ (यथा, मार्कण्डेये ।१८।३।
"यदर्थं गृह्यते शुल्कं तदनिष्पादयन् वृथा ।
पण्यानां द्वादशं भागं भूपालाय वणिग्जनः ॥"
सोमपालस्य पुत्त्रः । यथा, राजतरङ्गिण्याम् । ८ । ३४९५ ।
"सोमपालात्मजो भूभृद्द् भूपालः प्राकृतस्तथा ॥")

भूपुत्त्री, स्त्री, (भुवः पुत्त्री ।) सीता । इति शब्दरत्नावली ॥
("भूपुत्त्री यस्य पत्नी स भवतु कथं भूपती [रामचन्द्रः ॥"
इति रामायणम् ॥)

भूपेष्टः, पुं, (भूपानामिष्टः ।) राजादनीवृक्षः । इति राजनिर्घण्टः ॥

भूभर्त्ता, [ऋ] पुं, (भुवो भर्त्ता । "याजकादिभिश्च ।" २ । २ । ९ । इति षष्ठीसमासः ।) पृथिवीपतिः । इति सिद्धान्तकौमुद्यां तत्पुरुषसमासः ॥ (यथा, राजतरङ्गिण्याम् ।३।२९१।
"तस्मिन्नहनि भूभर्त्ता शोकाग्निःश्वसतानिशम् ॥")

भूभुक्, [ज्] पुं, (भुवं भुनक्ति पालयतीति । भुज् + "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) राजा । इति जटाधरः ॥ (यथा, कामन्दकीयनीतिसारे । ४ । ६१ ।
"सापसाराणि दुर्गाणि भुवः साऽनूपजाङ्गलाः ।
निवासाय प्रशस्यन्ते भूभुजां भूतिमिच्छताम् ॥")

भूभृत्, पुं, (भुवं बिभर्त्तीति । भृ + क्विप् । "ह्रस्वस्य पिति कृति तुक् । ६ । १ । ७१ । इति तुगागमश्च ।) राजा । (यथा, रघौ । ११ । ८१ ।
"तेन भूमिनिहितैककोटि तत्
कार्म्मुकञ्च बलिनाधिरोपितम् ।
निष्प्रभश्च रिपुरास भूभृताम्
धूमशेष इव धूमकेतनः ॥")
पर्व्वतः । इति मेदिनी । ते, १४० ॥ (यथा, कुमारसम्भवे । ६ । १ ।
"अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥")

भूमयी, स्त्री, (भू + मयट् + ङीप् ।) छाया । सा तु सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ ज्वदाल्लके, चि ॥